| | | | |
|---|---|---|---|
| नटः, [1]नटी, | नटः-नाटः, | निनटिषुः, | नानटः ; |
| नटितव्यम्, | नटयितव्यम्-नाटयितव्यम्, | निनटिषितव्यम्, | नानटितव्यम् ; |
| नटनीयम्, | नटनीयम्-नाटनीयम्, | निनटिषणीयम्, | नानटनीयम् ; |
| नाट्यम्, | नट्यम्,नाट्यम्, | निनटिष्यम्, | नानट्यम् ; |
| ईषन्नटः-[2]दुर्नटः-सुनटः ; | — | — | — |
| नट्यमानः, | नट्यमानः-नाट्यमानः, | निनटिष्यमाणः, | नानट्यमानः ; |
| नाटः, | नटः-नाटः, | निनटिषः, | नानटः ; |
| नटितुम्, | नटयितुम्-नाटयितुम्, | निनटिषितुम्, | नानटितुम् ; |
| [3]नट्टिः, | नटना-नाटना, | निनटिषा, | नानटा ; |
| नटनम्, | नटनम्-नाटनम्, | निनटिषणम्, | नानटनम् ; |
| नटित्वा, | नटयित्वा-नाटयित्वा, | निनटिषित्वा, | नानटित्वा ; |
| प्रणट्य, | [4]प्रणटय्य-प्रनाट्य, | निनटिष्य, | नानट्य ; |
| नटम् २, नटित्वा २, | [5]नटम् २-नाटम् २, नटयित्वा २-नाटयित्वा २, | निनटिषम् २, निनटिषित्वा २, | नानटम् २ ; नानटित्वा २. |

(658) **"नट अवस्पन्दने"** (X-चुरादिः-1545. अक. सेट्. उभ.)

अयं धातुः न णोपदेशः। 'णोपदेशास्त्वनर्द् नाट्' इति पर्युदासात्। अतः, 'उपसर्गादसमासेऽपि—' (8-4-14) इति णत्वं सोपसर्गे न भवति। 'अवस्यन्दने' इत्येके।

---

1. पचाद्यचि गौरादिपाठात् (4-1-41) स्त्रियां ङीष्।
2. 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वाच्यः' (वा. 1-4-60) इति वचनात् णत्वं न। एवं णोपदेशधातुषु सर्वत्र ज्ञेयम्।
3. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वम्।
4. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
5. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः।